पञ्चमः पाठः

4MSVZM

## नीतिश्लोकाः

सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।

सर्वे भद्राणि पश्यन्तु, मा कश्चिद् दुःखभाग्भवेत्।।1।।

अलसस्य कुतो विद्या? अविद्यस्य कुतो धनम्?

अधनस्य कुतो मित्रम्? अमित्रस्य कुतः सुखम्?।।2।।

विद्या ददाति विनयम्, विनयाद् याति पात्रताम्।

पात्रत्वाद् धनमाप्नोति, धनाद् धर्मः ततः सुखम्।।3।।

पुस्तकस्था तु या विद्या, परहस्तगतं धनम्।

कार्यकाले समुत्पन्ने, न सा विद्या न तद् धनम्।।4।।

परोपकाराय फलन्ति वृक्षाः, परोपकाराय वहन्ति नद्यः।

परोपकाराय दुहन्ति गावः, परोपकारार्थमिदं शरीरम्।।5।।

**शब्दार्थ**

**निरामयाः**=निरोग (निर् + आमय)। **दुःखभाग्** = दुःखी। **मा** = नहीं। **अलसस्य**= आलसी को। **अधनस्य**=निर्धन को, गरीब को। **पात्रताम्**=योग्यता को। **पात्रत्वात्**=योग्यता से। **आप्नोति**=प्राप्त करता है। **ततः**=उससे। **कुतः**=कहाँ। **परहस्तगतम्**=दूसरे हाथ में गया। **कार्यकाले**= आवश्यकता पड़ने पर अथवा अवसर आने पर।

अन्वय-

1. सर्वे सुखिनः भवन्तु। सर्वे निरामयाः सन्तु। सर्वे भद्राणि पश्यन्तु। कश्चित् दुःखभाग् मा भवेत्।

2. अलसस्य विद्या कुतः? (भवति) अविद्यस्य धनं कुतः? (भवति) अधनस्य मित्रं कुतः? (भवति) अमित्रस्य सुखं कुतः? (भवति)

3. विद्या विनयं ददाति। विनयात् पात्रतां याति। पात्रत्वात् धनम् आप्नोति। धनात् धर्मः (भवति)। ततः सुखं (भवति)।

4. या विद्या पुस्तकस्था (भवति), धनं तु परहस्तगतं (भवति)। कार्यकाले समुत्पन्ने सा विद्या (उपयोगाय) न भवति। तथैव तद् धनं (उपयोगाय न भवति)।

5. वृक्षाः परोपकाराय फलन्ति। नद्यः परोपकाराय वहन्ति। गावः परोपकाराय दुहन्ति। (अतः) इदं शरीरं परोपकारार्थं भवति।

**अभ्यास**

1. उच्चारण करें-

कश्चिद्    अविद्यस्य    पात्रत्वात्

दुःखभाग्भवेत्    पुस्तकस्था    परोपकारार्थमिदम्

धनमाप्नोति    परहस्तगतं    समुत्पन्ने

2. एक पद में उत्तर दें-

(क) सर्वे किं पश्यन्तु ? (ख) कस्य मित्रं न भवति ?


(ग) विद्या किं ददाति ? (घ) कीदृशं धनं धनं न भवति ?

3. रिक्त स्थानों की पूर्ति करें-

(क) सर्वे .............. पश्यन्तु। (ख) अमित्रस्य कुतः ...........।

(ग) परोपकाराय दुहन्ति ........। (घ) धनाद् धर्मः ततः .........।

4. बड़े वृत्त में दिये गये पदों के साथ छोटे वृत्त में दिये गये उचित क्रिया पदों को जोड़ते हुए वाक्य रचना करें -



(क) .........................। (घ) .........................।

(ख) .........................। (ङ) .........................।

(ग) .........................। (च) .........................।

5. संस्कृत में अनुवाद करें-

(क) विद्या विनय देती है।

(ख) विनय से योग्यता आती है।

(ग) परोपकार के लिए यह शरीर है।

पढ़ने के लिए

अधरं मधुरं वदनं मधुरं

नयनं मधुरं हसितं मधुरम्।

हृदयं मधुरं गमनं मधुरं

मधुराधिपतेरखिलं मधुरम्।

वचनं मधुरं, चरितं मधुरं

वसनं मधुरं वलितं मधुरम्

चलितं मधुरं भ्रमितं मधुरं

मधुराधिपतेरखिलं मधुरम्।

**शिक्षण-संकेत -**

नीतिश्लोकों का सस्वर पाठ कराएँ।

लोभः पापस्य कारणम्।